1. Hafta

# शुकः

अयं शुकः पञ्जरे बद्धस्तिष्ठति। पञ्जरं लोहस्य शलाकाभिः निर्मितम्। किमिति शुकाः पञ्जरे बध्यन्ते? शुकाः खलु शिक्ष्यमाणाः स्फुटं भाषन्ते। अतः शुकान् गृहीत्वा जनाः पञ्जरे स्थापयन्ति शिक्षयन्ति च।

शुकानां रूपमपि रुचिरम्। तेषां पक्षौ हरितौ। चञ्चुश्च लोहिता।

केचन शुकाः चित्रवर्णाः सन्ति। तेऽतीव मनोहराः।

शुकाः प्रायेण उष्णदेशेषु जायन्ते। वृक्षाणां कोटरेषु पाषाणानां छिद्रेषु वा ते निवसन्ति। पक्वानि फलानि शालिं मरिचं च ते भक्षयन्ति।

लवणं शुकानां विषम्। तस्मात् लवणेन मिश्रितं भक्ष्यं मा यच्छ शुकेभ्यः।